॥ सर्प सूक्त स्तोत्रम् ॥

ध्यान .....

ॐ नमोस्तु सर्पेभ्यो ये के च प्रथिवी मनु ।
ये अंतिरिक्षे ये दिवि तेभ्यो : सर्पेभ्यो नमः ॥

नाग स्तुतिः .....

एतैत सर्पाः शिवकण्ठभूषा । लोकोपकाराय भुवं वहन्तः ॥
भुतैः समेता मणिभूषितांगा । गृह्णीत पूजां परमं नमो वः ॥
कल्याणरुपं फणिराजमग्र्यं । नानाफणा मण्डलराज मानम् ॥
भक्त्यैकगम्यं जनताशरण्यं । यजाम्यहं नः स्वकुलाभिवृद्धयै ॥

नवनाग स्तोत्रम् .....

अनंतं वासुकिं शेषं पद्मनाभं च कम्बलम् ।
शंखपालं ध्रूतराष्ट्र तक्षकं कालियं तथा ॥
एतानि नव नामानि नागानां च महात्मनाम् ।
सायंकाले पठेन्नित्यं प्रातः काले विशेषतः ॥
तस्मे विषभयं नास्ति सर्वत्र विजयीं भवेत्

सर्प सूक्त .....

विष्णु लोके च ये सर्पाः वासुकि प्रमुखाश्च ये।
नमोऽस्तु तेभ्यः सर्पेभ्यः सुप्रीतो मम सर्वदा ॥१॥

रुद्र लोके च ये सर्पाः तक्षकः प्रमुखास्तथा।
नमोऽस्तु तेभ्यः सर्पेभ्यः सुप्रीतो मम सर्वदा ॥२॥

ब्रह्म लोके च ये सर्पाः शेषनागाः पुरोगमाः।
नमोऽस्तु तेभ्यः सर्पेभ्यः सुप्रीतो मम सर्वदा ॥३॥

इन्द्रलोकेषु ये सर्पा: वासुकि प्रमुखाद्य: ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥४॥

कद्रवेयश्च ये सर्पा: मातृभक्ति परायणा ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥५॥

इन्द्रलोकेषु ये सर्पा: तक्षका प्रमुखाद्य: ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥६॥

सत्यलोकेषु ये सर्पा: वासुकिना च रक्षिता ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥७॥

मलये चैव ये सर्पा: कार्कोट प्रमुखाद्य ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥८॥

पृथिव्यां चैव ये सर्पा: ये साकेत वासिता ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥९॥

सर्वग्रामेषु ये सर्पा: वसंतिषु संच्छिता ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥१०॥

ग्रामे वा यदि वारण्ये ये सर्पा: प्रचरन्ति च।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥११ ॥

समुद्रतीरे ये सर्पाये सर्पा जंलवासिन: ।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥१२॥

रसातले च ये सर्पा: अनन्तादि महाबला:।
नमोऽस्तु तेभ्य: सर्पेभ्य: सुप्रीतो मम सर्वदा ॥१३॥

॥ इति सर्प सूक्त स्तोत्रम् संपूर्णं ॥